आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १२१

व्यवहारमाला ।

नाम धर्मशास्त्रग्रन्थः ।

सोऽयं

दक्षिणापथान्तर्गत--त्रिवाङ्कूरसंस्थानास्थानविदुषा वे० शंङ्कट-

रामशर्मणा विद्याभूषणेन संशोधितः ।

स च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्यारण्यपत्तने

श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-

महाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितः ।

शालिवाहनशकाब्दाः १८८५ ।

ख्रिस्ताब्दाः १९४३ ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यमेको रूपकः (१) ।

व्यवहारमालाया विषयसमुद्देशः।

विषयाः	पृष्ठाङ्काः।	विषयाः	पृष्ठाङ्काः।
व्यवहारदर्शनविधिः	१	उद्ग्रहणविधिः	४०
प्राड्विवाकधर्माः	२	जयपराजयदण्डविधिः	४१
सभ्यासभ्योपदेशः	,,	ऋणादानप्रकरणम्	,,
व्यवहारलक्षणम्	५	उपनिधिप्रकरणम्	४२
पक्षाभासलक्षणम्	८	अस्वामिविक्रयप्रकरणम्	४३
आसेधप्रकरणम्	,,	संभूयसमुत्थानप्रकरणम्	४४
पुरुषान्तरनियोगविधिः	९	दत्ताप्रदानिकप्रकरणम्	४६
भाषोत्तरपादनिरूपणम्	१०	अभ्युपेत्याशुश्रूषाप्रकरणम्	४८
संधिप्रकरणम्	१४	वेतनानपाकर्मप्रकरणम्।	५२
क्रियापादः	,,	स्वामिपालविवादप्रकरणम्	५४
साक्षिनिरूपणम्	१५	समयानपाकर्मप्रकरणम्	५६
लेख्यनिरूपणम्	२२	विक्रीयासंप्रदानप्रकरणम्	५७
द्रव्यागमप्रकरणम्	२६	क्रीत्वानुशयप्रकरणम्	५९
अनुभोगानुसिद्धिः	२७	सीमाविवादप्रकरणम्	६०
अन्यभोगापवादः	२९	वाक्पारुष्यप्रकरणम्	६३
विच्छिन्नभोगनिर्णयः	,,	दण्डपारुष्यप्रकरणम्	६५
कोशपानादिविधिः	,,	स्तेयप्रकरणम्	६८
ऋणप्रयोगः	३२	साहसप्रकरणम्	७४
वृद्धिविधिः	,,	स्त्रीसंग्रहणप्रकरणम्	७७
आधिविधिः	३४	दायविभागप्रकरणम्	७९
प्रातिभाव्यविधिः	३७	द्यूतसमाह्वयप्रकरणम्	९१
ऋणस्य देयादेयविधिः	,,	प्रकीर्णकप्रकरणम्	९२

समाप्तोऽयं विषयसमुद्देशः।

निवेदना ।

धर्मशास्त्रग्रन्थोऽयं व्यवहारमालाख्यो यथामति संशोधितः। देवनागरलिपीभिर्मुद्रयित्वा प्रकाश्यते । इयं चान्वर्थाभिधा व्यवहारमाला । या पदनीयान् व्यवहारान् न्यक्षेणानुक्रमेण च वितत्य मतभेदकथनपूर्वकं प्रतिपादयन्ती धर्मस्थीये विषयजाते व्युत्पित्सून् व्युत्पन्नान् कर्तुमलम् । मनुयाज्ञवल्क्यादिभिः प्राक्तनैराचार्यैराकरग्रन्थात्मना स्मृत्वा स्मृत्वा संदृब्धेषु स्वोपज्ञेष्वाचार—व्यवहार—प्रायश्चित्त—प्रकीर्णकादिविधिसंदर्भेषु, ये तावद्युक्तदण्डधरस्य राज्ञो व्यवहारनिर्णयप्रयोजकास्तदङ्गभूताश्च विधयः, त एव तेभ्य एवाऽऽकरग्रन्थेभ्यस्ताद्रूप्येण समुच्चित्य विभागशो विषयवैशद्येन चात्र ग्रन्थे सुष्ठु संकलिताः प्रायशो दृश्यन्ते । अयं चार्थो ग्रन्थोपक्रमस्थचिकीर्षितप्रतिज्ञापद्ये—

मनुमुख्यसरःसमुद्भवैः सुकुमारैः प्रसवैर्वचोमयैः ।
त्रिदिवाप्तिफलैर्नृपोचितां रचयामि व्यवहारमालिकाम् ॥

इति ग्रन्थकृतैव निरूपितः ।

व्यवहारशब्दो न्यायपर्यायः । स चान्यायनिवृत्त्यर्थं मन्वादिभिः शिष्टैः प्रवर्तितः । द्रष्टा च तस्य न्यायस्य राजा । अन्यायप्रवृत्तानां दण्डस्य धारयिता । सामर्थ्यात् स्वधर्मस्थानामनुग्राहकश्च । विवादपर्यायश्च दृश्यते । व्यवहारशब्दस्य व्युत्पत्तिश्चैवमुपदर्शिता—

"वि नानार्थेऽव संदेहे हरणं हार इष्यते ।
नानासंदेहहरणाद् व्यवहारस्ततः स्मृतः ॥ " इति ।

प्रजापरिरक्षणं हि नाम राज्ञो धर्मः । प्रजानां रक्षणादवाप्तवृत्तिर्भवति राजा । तासामेवेतरेतरविवादजपीडापरिहारार्थमृणादानादिप्रकीर्णकपर्यन्ताष्टादशविधविवादे विरुद्धार्थार्थिप्रत्यर्थिवाक्यलेखादिप्रमाणजनितसंदेहहारी विचार एव व्यवहारपदार्थः । व्यवहारत एव राजा राष्ट्रं भर्तुं शक्तो भवति । व्यवहारमपश्यता राज्ञा न कदाचिदपि स्वस्थेन स्थातुं शक्यम् । तथा च सूक्तं विश्वरूपविकटोक्तिविस्तृतायां बालक्रीडायाम्—

इति संभृतमण्डलः सुधामा पुररुचिरो रमणः प्रतापशालिः ।
रविरिव नृपतिः समः प्रजानां जगदखिलं व्यवहारतो बिभर्ति ॥ इति ।

धर्मासनस्थो नृपतिः शास्त्रोक्तेनैव वर्त्मना विवादानुद्धरेत् । तथा कुर्वतो महीपालस्य—

संभवन्ति गुणाः सप्त सप्त वह्नेरिवार्चिषः।
धर्मश्चार्थश्च कीर्तिश्च लोकपक्तिरुपग्रहः॥
प्रजाभ्यो बहुमानं च स्वर्गस्थानं च शाश्वतम्॥

अतः स्वराज्यपरिरक्षणरूपधर्मसम्यङ्निर्वृत्तय आत्मसंपद्युक्तो राजा साक्ष्याद्यनुयोगं व्यवहारान् पश्येत्। तादृशव्यवहारदर्शनोपदेशपरं चेदं शास्त्रमनर्थनिवर्तनद्वारेण धर्मसाधकं भवति। राजा च सर्वान् व्यवहारान् तत्त्वतो निर्णीय किल्बिषं व्यपोह्य स्वर्गादिप्राप्तिरूपामुत्कृष्टां गतिं लभते।

किंचास्मिन्ग्रन्थ ऋणादानादिप्रकीर्णकान्तानामष्टादशधाभिन्नानां विवादपदानां निरूपणारम्भात्प्राग्विवादनिर्णयसौकर्यसंपादकं व्यवहारदर्शनविधि—प्राङ्विवाकधर्म—सभ्यासभ्योपदेश—व्यवहारलक्षण—पक्षाभासलक्षण—साक्षिस्वरूप—लेख्यस्वरूपादिकं प्रमेयजातमानुपूर्वीक्रमेण पूर्वाङ्गमर्यादयोपन्यस्तम्।

प्रायशः संकलनात्मकेऽस्मिन्ग्रन्थे कात्यायनः, नारदः, मनुः, बृहस्पतिः, व्यासः, याज्ञवल्क्यः, हारीतः, पितामहः, विष्णुः, संवर्तकः, भरद्वाजः, प्रजापतिः, दक्षप्रजापतिः, कण्वः, वृद्धमनुः, शङ्खः, यमः, वसिष्ठः, उशना, विश्वामित्रः, गौतमः, आपस्तम्बः, बोधायनः, देवलः, सुमन्तुः हरिः, काश्यपः, अङ्गिरा इत्येते धर्मशास्त्रकाराः प्रमाणिता दृश्यन्ते। याज्ञवल्क्यश्च--

वक्तारो धर्मशास्त्राणां मनुर्विष्णुर्यमोऽङ्गिराः।
वसिष्ठदक्षसंवर्तशातातपपराशराः॥
आपस्तम्बोशनोव्यासाः कात्यायनबृहस्पती।
गौतमः शङ्खलिखितौ हारीतोऽत्रिरहं तथा॥

इति धर्मशास्त्रकारान् संख्यानियमतो निर्दिशति। वृद्धयाज्ञवल्क्यश्च--

नारदः पुलहो गार्ग्यः पुलस्त्यः शौनकः क्रतुः।
बोधायनो जातुकर्णो विश्वामित्रः पितामहः॥

इति पद्येन स्मृतिकारान्दशैवाऽऽह। कतिपयपूर्वाचार्यप्रकीर्तनमिदं याज्ञवल्क्यस्य वृद्धयाज्ञवल्क्यस्य वा तदुपजीव्यत्वमवगमयतीत्यवसातुमलम्। यद्यन्यानपि धर्मशास्त्रप्रवक्तृनाचार्यांस्तावज्ञास्यतामवश्यमस्मरिष्यताम्। न ह्येतावताऽन्येषां धर्मशास्त्रकाराणां सत्ता बाधिता। यत एतद्व्यतिरिक्ताश्चाऽऽचार्या दृश्यन्ते। येषां च ग्रन्थास्तत्र तत्र प्रकाशिताः। स्वसद्भावसुलभतुल्यमहिमानो बहुलमुपलभ्यन्ते। उद्धियन्ते चार्वाचीनैः शास्त्रकारैः। एतदवधिधर्मशास्त्रकाराणां संख्यानियमश्च नावधारित एव वर्तते।

इतः शतकत्रयात्पूर्वं भारतसाम्राज्यमिदमाङ्ग्लेया(ङ्ग्ला)धिपत्यसाचिव्यमलभत। तदानीं हिन्दूनां(भारतीयानां) सामुदायिकेषु राष्ट्रियेषु व्यावहारिकेषु च विषयेषु विज्ञानरहितानां पश्चिमानां तेषां हिन्द्यासाम्राज्यभरणमतीव सौकर्यापेतमवर्तत। ततस्तेषां हैन्दवविज्ञानीयेषु परिचितिसिद्ध्यै तदात्वे गवर्णरजनरलपदमाधिष्ठिता वारणहास्तिङ्ग्सप्रभुवर्येण प्रथमतो वारणस्यां संस्कृतविद्यामन्दिरमेकं प्रस्थापितमभूत्। यत्र च जगन्नाथपण्डित-गङ्गाधरशास्त्रिप्रमुखाः श्रुतिस्मृतिविशारदा विद्वांस आचार्यकमलंचकुः। गैर्वाण्युपनिबद्धान् विविधशास्त्रमयान् ग्रन्थानाङ्ग्ल्या विपरिणमयितुं हिन्दुजनानुयोज्यानि नियमशास्त्राण्यारचयितुमाङ्ग्लानामन्येषां च श्रुतिस्मृत्यादिषु विज्ञानं संपादयितुं चोपयुक्ताः पद्धतयो रूपीकृताश्चाऽऽसन्।

आङ्ग्लेयाधिपत्यात्प्राग्भारतवर्षमिदं खण्डशो बहुभी राजभिर्भृतमासीत्। तेषां च महीक्षितां प्रजास्वितरेतरपीडायां तत्त्वनिर्णयार्थं व्यवहारदर्शनमत्यावश्यकमभूत्। अतिविततत्वाद्विप्रकीर्णविषयत्वाद् व्यवहारान्तःपातिबहुप्रमेयगर्भतया च मन्वादिस्मृतीनां राज्ञो व्यवहारदर्शनोपयोगिनमुपदेशमानुपूर्व्या प्रदातुं ता अप्रभविष्णव आसन्। तस्मात्प्रजाभूतामाज्ञातः स्वयं कौतुकाच्च धर्मशास्त्रनिष्णातैर्विपश्चिद्भिः प्राचीनस्मृतिग्रन्थेभ्यो व्यवहादर्शनोपदेशपरान् भागान् समुच्चित्य व्यवहारमालाख्योऽयं ग्रन्थ एतत्सजातीयाश्चान्ये बहवः संदर्भा निरमायिषत। इयं च व्यवहारमाला दक्षिणापथे प्रवृत्तचक्राणां केरलेश्वराणां मण्डलेषु प्रमाणतयोपयुक्ताऽभवदिति विज्ञायते। अस्याः कर्ता कः कृत्यः कदा बभूवेत्यादिकं न त्ववगतम्।

कामं वर्षपूगात्प्रागस्य ग्रन्थस्य त्रय आदर्शा अस्माभिः समुपलब्धाः। ते च शुद्धप्रायाः केरलीयलिपयो द्विशतवयसस्तालपत्रात्मका भूयसा संवदन्तश्च। यानवष्टभ्यास्य संशोधनकृत्यं निर्व्यूढं तत्र प्रथमः कन्याकुमारिसमीपवर्तिमहादानपुरग्रामाभिजनब्रह्मश्री काशि[नाथ]शास्त्रिमहाशयैः सादरं दत्तः कसंज्ञकः। द्वितीयः त्रिवाङ्कूरराष्ट्रीयतिरुवल्लाजनपदान्तर्गततोलशेरिप्रदेशाभिजनब्रह्मश्री—पी०सी०नारायणभट्टतिरित्रिस्वामिकः खसंज्ञकः। तृतीयश्च तत्रैव प्रदेशे जराजर्जरितमहार्घग्रन्थरत्नावतंसितात् कुलिक्काट्टुगृहादासादितोऽन्तविकलो गसंज्ञकः। आदर्शदानेनोपकृतवद्भ्यो महाशयेभ्यो बहु कं धारयामः। एष्वादर्शेषु गसंज्ञकः खसंज्ञकस्य प्रतिरूपमिति विज्ञायते। त्रिष्वप्येतेष्वादर्शेषु विरलतयैव दृष्टा भिन्नपाठाः। तेष्वादित्सिता एव पाठास्तत्र तत्र संनिवेशिताः।

ग्रन्थेऽस्मिन् संकलितेषु परमर्षिवाक्येषु क्वचिच्छब्दाध्याहारः क्वचिदर्थाध्याहारश्चाऽऽवश्यकः। तादृशेषु स्थलेषु ग्रन्थान्तरप्रज्ञाततमत्वादनुक्तमाकाङ्क्ष्यमाणमर्थमञ्जसाऽवबोद्धुं ग्रन्थतात्पर्यविभावनपरभाषाटीकासचिवमस्य ग्रन्थस्य संस्करणम्, केरलभाषासाहित्यसाम्राज्यसार्वभौमायमानैः श्रीयुतपरमेश्वरार्यैः प्रसाधितम्, बहूपाकरोदित्यपि सकृतज्ञं स्मर्यते।

इदानीं महाजनसमक्षमुपायनीकृतेऽस्मिन् ग्रन्थेऽस्मादृशाल्पप्रज्ञसुलभा मुद्रणसंभवा वाऽशुद्धयो मानवीयज्ञानस्य स्खलनशीलतां विभाव्य मर्षणीयाः।

व्यवहारमालामिमामानन्दाश्रमग्रन्थावल्यामधिरोप्य प्रकाशयितुमनस आश्रमप्रवर्तकसमितेः, विशिष्य तत्कार्यदर्शिनां च भक्तिबहुमानपूतां कृतज्ञतां प्रकाशयामः। इतश्चोत्तरोत्तरमस्मिन्नाश्रमेऽपूर्वग्रन्थप्रकाशनपरिश्रमस्याभिवृद्ध्यै श्रुतिस्मृतिजनयितुर्भगवतो धर्मस्वरूपस्य स्वयंज्योतिषः प्रसादाः सन्त्विति परमाशास्महे।

अनन्तशयनम्,
कोळम्बवर्ष

वे० वेङ्कटरामशर्मा विद्याभूषणः।

ॐ तत्सद्ब्रह्मणे नमः ।

व्यवहारमाला ।

अथ व्यवहारदर्शनविधिः ।

नमस्ते नरसिंहाय भक्तानुग्रहकारिणे ।
अजाय बहुरूपाय सर्गास्थित्यन्तकारिणे ॥
मनुमुख्यसरस्समुद्भवैः सुकुमारैः प्रसवैर्वचोमयैः ।
त्रिदिवाप्तिफलैर्नृपोचितां रचयामि व्यवहारमालिकाम् ॥
मनुः प्रजापतिर्यस्मिन्काले राज्यमबूभुजत् ।
धर्मैकतानाः पुरुषास्तदाऽऽसन् सत्यवादिनः ॥
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रकीर्तितः ॥
द्रष्टा च व्यवहाराणां राजा दण्डधरः स्मृतः ।

सभा प्रवेशः ।

व्यवहारं दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम् ॥
तत्राऽऽसीनः स्थितो वाऽपि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत् कार्याणि कार्यिणाम् ॥
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः ।
अष्टादशसु मार्गेषु निबद्धानि पृथक्पृथक् ॥

कार्यविस्तरारम्भः ।

धर्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् ॥
यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम् ।
नयेत् तथानुमानेन धर्मस्य नृपतिः पदम् ॥
कात्यायनः—सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यप्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥

---

१ ख. °रः कृतः । २ ख. °हारान् दि°

श्रुतिस्मृतिविरुद्धं च भूतानामहितं च यत् ।
न तत् प्रवर्तयेद्राजा प्रवृत्तं च निवर्तयेत् ॥

नारदः—धर्मार्थशास्त्रतत्त्वाभ्यामविरोधेन पार्थिवः ।
परीक्षमाणो निपुणं व्यवहारगतिं नयेत् ॥
दिवसस्याष्टमं भागं मुक्त्वा कालत्रयं च यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ॥

इति व्यवहारदर्शनविधिः ।

अथ प्राड्विवाकधर्माः ।

मनुः—यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् ।
तदा नियुञ्ज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥
सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः ।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ।

बृहस्पतिः—विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ।

नारदः—यथा शल्यं भिषक्कायादुद्धरेद्यन्त्रयुक्तितः ।
प्राड्विवाकस्तथा शल्यमुद्धरेद् व्यवहारतः ॥

कात्यायनः—यत्र विप्रो न विद्वान् स्यात् क्षात्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ॥

व्यासः—द्विजान् विहाय यः पश्येत् कार्याणि वृषलैः सह ।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशं च नश्यति ।

इति प्राड्विवाकधर्माः ।

अथ सभ्यासभ्योपदेशः ।

दुर्गमध्ये गृहं कुर्याज्जलपुष्पान्वितं पृथु ।
प्राग्दिशि प्राङ्मुखीं तत्र कल्याणीं कल्पयेत् सभाम् ।
माल्यधूपासनोपेतां बीजरत्नसमाकुलाम् ।
प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा ॥

प्रतिष्ठिता चला चैव मुद्रिता शासिता तथा।
चतुर्विधा सभा प्रोक्ता सभ्याश्चैव तथाविधाः॥
प्रतिष्ठिता पुरे ग्रामे चला नामाप्रतिष्ठिता।
मुद्रिताध्यक्षसंयुक्ता राजयुक्ता च शासिता॥
नृपाधिकृतसभ्याश्च स्मृतिर्गणकलेखकौ।
हेमाग्न्यम्बुस्वपुरुषाः साधनाङ्गानि वै दश॥
एषां मूर्धा नृपोऽङ्गानां मुखं चाधिकृतः कृतः।
बाहू सभ्याः स्मृतिर्हस्तौ जङ्घे गणकलेखकौ॥
हेमाग्न्यम्बुदृशस्तत्र पादौ स्वपुरुषास्तथा।
दशानामपि चैतेषां कर्म प्रोक्तं पृथक् पृथक्॥
वक्ताऽध्यक्षो नृपः शास्ता सभ्याः कार्यपरीक्षकाः।
स्मृतिर्विनिर्णयं ब्रूते जयं दानं दमस्तथा॥
शपथार्थे हिरण्याग्नी तृषितक्षुब्धयोर्जलम्।
गणको गणयेदर्थं लिखेत् कार्यं च लेखकः।
प्रत्यर्थिसभ्यानयनं साक्षिणां च स्वपूरुषः॥
कुर्यादनर्गलौ रक्षेदर्थिप्रत्यर्थिनौ सदा।
एतद् दशाङ्गकरणं यस्यामध्यास्य पार्थिवः॥
न्यायान् पश्येत् कृतमतिः सा सभाऽध्वरसंनिभा।
शब्दाभिधानतत्त्वज्ञौ गणने कुशलौ शुची।
नानालिपिज्ञौ कर्तव्यौ राज्ञा गणकलेखकौ॥

कात्यायनः—मतिशीलवयोवृत्तावित्तवद्भिरमत्सरैः।
वणिग्भिः स्यात् कतिपयैः कुलोद्भूतैरधिष्ठितः॥

बृहस्पतिः—लोकवेदाङ्गधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राग्र्याः सा यज्ञसदृशी सभा॥

याज्ञवल्क्यः—श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः।

नारदः—राजा तु धार्मिकान् सभ्यान् नियुञ्ज्यात् सुपरीक्षितान्।
व्यवहारधुरं वोढुं ये शक्ताः सद्वृषा इव॥

---

१ ख. वेदवे°

कुलानि श्रेणयश्चैव सभ्याश्चाधिकृता नृपः ।
प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरम् ।
कुलादिभिः कृतं कार्यं विचार्यं तद् यथोत्तरम् ।
असंतुष्टस्य कर्तव्यं यावद् राजकृतं भवेत् ।
रागाद् द्वेषाद् भयाद् वाऽपि स्मृत्यपेतादिकारिणः ।
सभ्याः पृथक् पृथक् दण्ड्या विवादाद् द्विगुणं दमम् ॥

सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।
अब्रुवन् विब्रुवन् वाऽपि नरो भवति किल्बिषी ॥
पादोऽधर्मस्य कर्तारं पादो गच्छति साक्षिणः ।
पादः सभासदः सर्वान् पादो राजानमृच्छति ।
न्यायशास्त्रमतिक्रम्य सभ्यैर्यत्र विनिश्चितम् ।
तत्र धर्मो ह्यधर्मेण हतो हन्ति नराधिपम् ॥

राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥

नारदः—यत्र सभ्याः सभां प्राप्य तूष्णीं ध्यायन्त आसते ।
यथाप्राप्तं च न ब्रूयुः सर्वे तेऽनृतवादिनः ।
नानियुक्तेन वक्तव्यं व्यवहारेषु किंचन ।
नियुक्तेन तु वक्तव्यमपक्षपतितं वचः ॥

नियुक्तो वाऽनियुक्तो वा शास्त्रज्ञो वक्तुमर्हति ।
दैवीं वाचं स वदति यः शास्त्रमुपजीवति ॥

नारदः—न सा सभा यत्र न सन्ति वृद्धा ।
न ते वृद्धा ये न वदन्ति धर्मम् ।

नासौ धर्मो यत्र न सत्यमस्ति ।
न तत् सत्यं यच्छलेनानुविद्धम् ॥

बृहस्पतिः—अन्यायवादिनः सभ्यास्तथैवोत्कोचजीविनः ।
विश्वस्तवञ्चकाश्चैव निवार्याः सर्व एव ते ॥

कात्यायनः—अनिर्णीतेऽत्र यद्येष संभाषेत रहोऽर्थिना ।
प्राड्विवाकोऽपि दण्ड्यः स्यात् सभ्याश्चैव न संशयः ॥

देशाचारानभिज्ञा ये नास्तिकाः शास्त्रवर्जिताः ।
उन्मत्तक्रुद्धलुब्धार्ता न प्रष्टव्या विनिर्णये ॥
न्यायमार्गादपेतं तु ज्ञात्वा चित्तं महीपतेः ।
वक्तव्यं तत्प्रियं तत्र न सभ्यः किल्बिषी भवेत् ॥
लिङ्गिनः श्रेणिपूगाश्च वणिग्व्रातास्तथाऽपरे ।
स्वधर्मेणैव कार्याणि कुर्युस्ते निर्णयं सदा ॥
वणिक्कृषिल्पप्रयोगेषु कृषिरङ्गोपजीविषु ।
रागद्वेषादिकं त्यक्त्वा यः कुर्यात् कार्यनिर्णयम् ।
शास्त्रोदितेन विधिना तस्य यज्ञफलं भवेत् ।
सत्यं देवा समासेन मनुष्यास्त्वनृतं विदुः ॥
इहैव तस्य देवत्वं यस्य सत्ये स्थिता मतिः ।
अधर्मं तु यदा राजा नियुञ्जीत विवादिनाम् ।
विज्ञाप्य नृपतिं सभ्यस्तदा सम्यङ्निवर्तयेत् ॥

इति सभ्यासभ्योपदेशः ।

अथ व्यवहारलक्षणम् ।

प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे ।
साध्यमूलस्तु यो वादो व्यवहारः स उच्यते ॥
वि नानार्थेऽव संदेहे हरणं हार इष्यते ।
नानासंदेहरणाद् व्यवहारस्[1]ततः स्मृतः ॥

नारदः—चतुष्पाच्च चतुःस्थानश्चतुःसाधन एव च ।
चतुर्हितश्चतुर्व्यापी चतुष्कार्यी प्रकीर्तितः ।
त्रियोनिर्द्वर्त्यभियोगश्च द्विद्वारो द्विगतिस्तथा ।
अष्टाङ्गोऽष्टादशपदः शतशाखस्तथैव च ॥
धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
चतुष्पाद् व्यवहारोऽयमुत्तरः पूर्वबाधकः ।
तत्र सत्ये स्थिते धर्मो व्यवहारश्च साक्षिषु ॥
चरित्रं पुस्तककृतं राजाज्ञायां तु शासनम् ।

---

१ ख. °र इति स्मृ° । ग. °रस्तथा स्मृ° ।

सामाद्युपायसाध्यत्वाच्चतुःशासन उच्यते ।
चतुर्णामपि वर्णानां रक्षणाच्च चतुर्हितः ॥
कर्तृनथो साक्षिणश्च सभ्यान्राजानमेव च ।
व्याप्नोति पादशो यस्माच्चतुर्व्यापी ततः स्मृतः ॥
धर्मस्यार्थस्य यशसो लोकवृत्तेस्तथैव च ।
चतुर्णां कारणादेव चतुष्कार्यी प्रकीर्तितः ॥
कामात्क्रोधाच्च मोहाच्च त्रिभ्यो यस्मात्प्रवर्तते ।
त्रियोनिः कीर्त्यते तेन त्रयमेवं विवादकृत् ॥
द्व्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः ।
शङ्का सतां तु संसर्गात्तत्त्वं होढादिदर्शनात् ॥
पक्षद्वयाभिसंबधाद्द्विद्वारः स उदाहृतः ।
भूतच्छलानुकारित्वाद्द्विगतिः स उदाहृतः ॥
भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ।
राजा स्वपुरुषाः सभ्याः शास्त्रं गणकलेखकौ ॥
हिरण्यमग्निरुदकमष्टाङ्गः स उदाहृतः ।
ऋणादानं ह्युपनिधिः संभूयस्थानमेव च ॥
दत्तस्य पुनरादानमशुश्रूषाऽभ्युपेत्य च ।
वेतनस्यानपाकर्म तथैवास्वामिविक्रयः ॥
विक्रीयासंप्रदानं च क्रीत्वाऽनुशय एव च ।
समयस्यानपाकर्म विवादः क्षेत्रजस्तथा ॥
स्त्रीपुंसयोश्च संबन्धो दायभागोऽथ साहसम् ।
वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च ॥
द्यूतं प्रकीर्णकं चैवमष्टादशपदः स्मृतः ।

बृहस्पतिः—द्विसप्तकोऽर्थमूलस्तु हिंसामूलश्चतुर्विधः ।
पारुष्ये द्वे वधश्चैव परस्त्रीसंग्रहस्तथा ॥
हिंसोद्भवानि चत्वारि पदान्याह बृहस्पतिः ।
एषामेव प्रभेदोऽन्यः शतमष्टोत्तरः स्मृतः ॥
क्रियाभेदो मनुष्याणां शतशाखो निगद्यते ।
पश्वाज्यऋत्विगादीनां संयोगाज्जायतेऽध्वरः ॥

यथा संबध्यते तेन व्यवहारस्तथोच्यते ।
यज्ञेऽनुपूज्यते विष्णुर्व्यवहारे महीपतिः ॥
यजमानो जयी तत्र जितः पशुरुदाहृतः ।
पूर्वपक्षोत्तरावाज्यं प्रतिज्ञा च हविः स्मृतः(ता) ॥
त्रयी शास्त्राणि सभ्याश्च ऋत्विजां दक्षिणा दमः ।
तथा चैवोपद्रष्टारौ ज्ञेयौ गणकलेखकौ ।
एषोऽध्वरसमः प्रोक्तो व्यवहारः समाहृतः ॥
स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ।

मनुः—नोत्पादयेत् स्वयं कार्यं राजा नाप्यस्य पूरुषः ।
न च प्रापितमन्येन ग्रसेत् कार्यं कथंचन ॥
रागादिना यदेकेन कोपितः कारणं वदेत् ।
तदोमिति लिखेत् सर्वं वादिने फलकादिषु ॥

बृहस्पतिः—पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेख्येन फलके ततः पत्रे विशोधितम् ॥
अधिकान् छादयेदर्थान् न्यूनांश्च परिपूरयेत् ।
भूमौ निवेशयेत्तावद् यावत् सोऽर्थो न निश्चितः ॥
निरवद्यां सप्रतिज्ञां प्रमाणागमसंयुताम् ।
अल्पाक्षरां प्रभूतार्थां निःसंदिग्धां निराकुलाम् ।
आवेदयेद् विवादार्थी परेणान्यायपीडितः ।
आवेद्य तु गृहीतेऽर्थे प्रशमं यान्ति ये मिथः ।
अभियोगानुरूपेण तेषां दण्डं प्रकल्पयेत् ॥
पूर्वोत्तरे संप्रविष्टे विचारे च प्रवर्तिते ।
प्रशमं ये मिथो यान्ति दाप्यास्ते द्विगुणं दमम् ॥
आवेद्य तु गृहीतेऽर्थे प्रशमं यान्ति ये मिथः ।
सर्वे द्विगुणदण्डास्तु विप्रलम्भान्नृपस्य तु ॥
काले कार्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितम् ।
किं कार्यं का च ते पीडा मा भैषीर्ब्रूहि मानव ॥

---

१ क. ख. °सेदर्थं क° । २ ख. °ण. तस्य द° ।

एवं पृष्टः स यद्ब्रूयात्तत् सभ्यैर्ब्राह्मणैः सह ।
विमृश्य कार्यं न्यायं चेदाह्वानार्थमतः परम् ॥
मुद्रां दद्यात्तथा पत्रं पुरुषं वा समादिशेत् ।
आहूतस्त्ववमन्येत यः शक्तो राजशासनम् ॥
अभियोगानुरूपेण तस्य दण्डं प्रकल्पयेत् ।
हीने कर्मणि पञ्चाशन्मध्यमे द्विशतावरः ॥
गुरुकार्ये च दण्डः स्यान्नित्यं पञ्चशतावरः ।
इति व्यवहारलक्षणम् ।

अथ पक्षाभासलक्षणम् ।

बृहस्पतिः—पतितादिकृतश्चैव यश्च न प्रकृतं गतः ।
अस्वतन्त्रकृतश्चैव पूर्वपक्षो न सिध्यति ॥
मत्तोन्मत्तार्तव्यसनिबालवृद्धप्रयोजितः ।
असंबन्धकृतश्चैव व्यवहारो न सिध्यति ॥
गुरुशिष्यौ पितापुत्रौ दम्पती स्वामिभृत्यकौ ।
एतेषां समवेतानां व्यवहारो न सिध्यति ॥
एकस्य बहुभिः सार्धं स्त्रीणां प्रेष्यजनस्य च ।
अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः ॥
अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत् ॥
इति पक्षाभासलक्षणम् ।

अथाऽऽसेधप्रकरणम् ।

वक्तव्येऽर्थे न तिष्ठन्तमुत्क्रामन्तं च तद्वचः ।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ॥
स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा ।
चतुर्विधः स्यादासेध आसिद्धस्तं न लङ्घयेत् ॥
क्षेत्रारामगृहादीनि धनधान्यादिकं तथा ।
अन्यायवादिनां त्वेतान्यासेधव्यानि वादिना ॥

---

१ ख. °वाद्यथा ।

आसेद्धा तु स्वमासेधं स्वयमेवोत्सृजेद्यदि ।
न तस्यांतिक्रमाद्दोषो न च दण्डं प्रकल्पयेत् ॥
राज्ञे निवेदनादूर्ध्वमासेद्धा नोत्सृजेत्स्वयम् ।
उत्सृजेच्चेद्दमो दाप्य आसिद्धश्च न लङ्घयेत् ॥
नदीसंतारकान्तारदुर्देशोपप्लवादिषु ।
आसिद्धस्तु परासेधमुत्क्रामन्नापराध्नुयात् ॥
निवेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथाऽन्येन राजकार्योद्यतस्तथा ॥
गवां प्रचारे गोपालाः सस्यारम्भे कृषीवलाः ।
शिल्पिनश्चापि तत्काल आयुधीयाश्च विग्रहे ॥
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थश्च नाऽऽसेध्यो न चैतानाह्वयेन्नृपः ॥
वृक्षं पर्वतमारूढा हस्त्यश्वरथनौस्थिताः ।
विषमस्थाश्च ते सर्वे नाऽऽसेध्याः कार्यसाधकैः ॥
यस्त्विन्द्रियनिरोधेनाप्याहारोच्छ्वसनादिभिः ।
आसेधयेदनासेधैः स दण्ड्यो नत्वतिक्रमी ॥
न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम् ।
सर्ववर्णोत्तमां कन्यां यां जातिप्रभुकां स्मृताम् ॥
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः ।
निष्कुला याश्च पतितास्तासामाह्वानमिष्यते ।

इत्यासेधप्रकरणम् ।

अथ पुरुषान्तरनियोगविधिः ।

हारीतः—यो न भ्राता न च पिता न पुत्रो न नियोगकृत् ।
परार्थवादी दण्ड्यः स्याद्व्यवहारेषु विब्रुवन् ॥

नारदः—अर्थिना संनियुक्तो वा प्रत्यर्थिप्राहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥

बृहस्पतिः—यस्याभियोगं कुरुते सत्येनाऽऽशङ्क्याऽपि वा ।
तमेवाऽऽनयेद्राजा मुद्रया पुरुषेण वा ।

देशं कालं च विज्ञाय कार्याणां च बलाबलम् ।
अकल्यादीनपि शनैर्यानैरेवाऽऽह्वयेन्नृपः ॥
उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ।

कात्यायनः—अथ चेत्प्रतिभूर्नास्ति वादयोग्यस्य वादिनः ।
स रक्षितो दिनस्यान्ते दद्याद्दूताय वेतनम् ॥
द्विजातिः प्रतिभूहीनो रक्ष्यः स्याद्बाह्यचारिभिः ।
शूद्रादीन्प्रतिभूहीनान्बन्धयेन्निगलेन तु ॥
अतिक्रमेऽपयाने च दण्डयेत्तं पणाष्टकम् ।
नित्यकर्मोपरोधस्तु न कार्यः सर्ववर्णिनाम् ॥

इति पुरुषान्तरनियोगविधिः ।

अथ भाषोत्तरपादनिरूपणम् ।

अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ ।
वर्णक्रमेण सर्वाणि पश्येत्कार्याणि कार्यिणाम् ॥
यस्य वाऽप्यधिका पीडा कार्ये वाऽभ्यधिकं भवेत् ।
तस्यार्थवादो दातव्यो न यः पूर्वं निवेदयेत् ॥

याज्ञवल्क्यः—प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमार्थिना ।
समामासतदर्धाहर्नामजात्यादिचिह्नितम् ॥

बृहस्पतिः—निरवद्यं सप्रतिज्ञं प्रमाणागमसंयुतम् ।
द्रव्यसंख्योदयं पीडां क्षमालिङ्गं च लेखयेत् ॥
देशः कालस्तथा स्थानं संनिवेशस्तथैव च ।
ज्ञातृसंज्ञा निवासश्च प्रमाणं क्षेत्रनाम च ॥
पितृपैतामहं चैव पूर्वराजानुकीर्तनम् ।
स्थावरेषु विवादेषु दशैतानि निवेशयेत् ॥
शङ्काभियोगस्तथ्यं च लब्धेऽर्थेऽभ्यर्थनं तथा ।
वृत्ते वादे पुनर्वादः पक्षो ज्ञेयश्चतुर्विधः ॥
भ्रान्तिः शङ्का समुद्दिष्टा तथ्यं नष्टार्थदर्शनम् ।
लब्धेऽर्थेऽभ्यर्थनं मोहाद्वृत्ते वादे पुनः क्रिया ॥

देशकालविहीनश्च द्रव्यसंख्याविवर्जितः।
साध्यप्रमाणहीनश्च पक्षो नादेय इष्यते॥
अभियोक्ताऽप्रगल्भत्वाद्वक्तुं नोत्सहते यदि।
तस्य कालः प्रदातव्यः कार्यशक्त्यनुरोधतः॥
श्वो लेखनं वा लभते त्र्यहं सप्ताहमेव वा।
मतिरुत्पद्यते यावद्विवादे वक्तुमिच्छतः॥
बृहस्पतिः—पाण्डुलेख्येन फलके भूमौ वा प्रथमं लिखेत्।
ऊनाधिकं तु संशोध्य ततः पत्रे निवेशयेत्॥
बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितम्।
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया॥
नारदः—न्यायं वा नेच्छते कर्तुमन्यायं वा करोत्ययम्।
न लेखयति यस्त्वेवं तस्य पक्षो न सिध्यति॥
शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनम्।
अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत्॥
विनिश्चिते पूर्वपक्षे ग्राह्याग्राह्ये विशोधिते।
प्रतिज्ञार्थे स्थिरीभूते लेखयेदुत्तरं ततः॥
शालीनत्वाद् भयाद्वाऽपि प्रत्यर्थी स्थितिविभ्रमात्॥
कालं प्रार्थयते यत्र तत्रैवं लब्धुमर्हति॥
एकाहं द्व्यहं चैव पञ्चसप्ताहमेव वा।
मासं मासत्रयं वर्षं लभते साक्ष्यपेक्षया॥
कालं शक्तिं विदित्वा तु कार्याणां च बलाबलम्।
अल्पं वा बहु वा कालं दद्यात्प्रत्यर्थिने प्रभुः।
गोभूहिरण्यस्तेयेषु पारुष्यात्ययिकेषु च॥
साहसेष्वपवादे च सद्य एव विवादयेत्।
कात्यायनः—सद्यः कृतेषु कार्येषु सद्य एव विवादयेत्।
कालातीतेषु वा कालं दद्यात्प्रत्यर्थिने प्रभुः॥
यदा त्वेकविधः पक्षः कल्पितः पूर्ववादिना।
दद्यात्तत्पक्षसंबन्धं प्रतिवादी तथोत्तरम्॥
नारदः—पक्षस्य व्यापकं सारमसंदिग्धं निराकुलम्।
अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुः॥

मिथ्यासंप्रतिपत्त्या वा प्रत्यवस्कन्दनेन वा ।
प्राङ् न्यायविधिसिद्ध्या वाऽप्युत्तरं स्याच्चतुर्विधम् ॥
मिथ्यैतन्नाभिजानामि, तदा तत्र न संनिधिः ।
अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधा ॥
श्रुत्वा भाषार्थमन्यस्तु यदा तं प्रतिषेधति ।
अर्थतः शब्दतो वाऽपि मिथ्या तज्ज्ञेयमुत्तरम् ॥
मिथ्योक्तेषु चतुष्पात्स्यात्प्रत्यवस्कन्दने तथा ।
प्राङ्न्याये तु त्रिपाज्ज्ञेयो द्विपात्संप्रतिपत्तिषु ॥
पूर्वपक्षश्चोत्तरश्च प्रत्याकलित एव च ।
क्रियापादश्च विज्ञेयश्चतुष्पात्स उदाहृतः ॥
तथ्ये तथ्यं प्रयुञ्जीत मिथ्या मिथ्ये च लेखयेत् ।
कारणं कारणोपेते प्राङ्न्याये तु जयं तथा ॥
मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे ।
सत्यं वाऽपि तथाऽन्येन तत्र ग्राह्यं किमुत्तरम् ॥
मिथ्याकारणयोर्वाऽपि ग्राह्यं कारणमुत्तरम् ।
यत्प्रभूतार्थविषयं यत्र वा स्यात्क्रियाफलम् ॥
उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा ।

व्यासः—प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम् ।
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न संभवेत् ॥
कारणात् पूर्वपक्षोऽपि ह्युत्तरत्वं प्रपद्यते ।
अतः क्रिया सदा प्रोक्ता पूर्वपक्षप्रसाधिनी ॥

याज्ञवल्क्यः—साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ।

कात्यायनः—संदिग्धमन्यत्प्रकृतमत्यल्पमतिभूरि च ।
पक्षैकदेशव्या(पि) तु तच्च नैवोत्तरं भवेत् ।
व्यत्यस्तपदमव्यापि निगूढार्थं तथाऽऽकुलम् ॥
व्याख्यागम्यमसारं च नोत्तरं शंसते[1] बुधः ।
पक्षैकदेशे यत्सत्यमेकदेशे च कारणम् ॥

---

१ ख. शस्यते बुधः ।

मिथ्या चैवैकदेशे च संकरात्तदनुत्तरम्।
न चैकस्मिन् विवादे तु क्रिया स्याद्वादिनोर्द्वयोः॥
न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयम्।
अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्।
अभियुक्तं न चान्येन नोक्तं विप्रकृतिं नयेत्।
कुर्यात् प्रत्यभियोगं तु कलहे साहसेषु च॥

बृहस्पतिः—पूर्वपक्षे यथार्थं तु न दद्यादुत्तरं हि यः।
प्रत्यर्थी दापनीयः स्यात् सामादिभिरुपक्रमैः।
प्रियपूर्वं वचः सामं भेदस्तु भयदर्शनम्।
अर्थापकर्षणं दण्डो बन्धनं ताडनं तथा॥
उपायैश्चोद्यमानोऽपि न दद्यादुत्तरं तु यः।
अतिक्रान्ते सप्तरात्रे जितोऽसौ दण्डमर्हति॥

कात्यायनः—उभयोर्लिखिते वाक्ये प्रारब्धे कार्यनिर्णये।
अनुक्तं तत्र यो ब्रूयात् तदर्थात् स तु हीयते॥
मोहाद्वा यदि वा शाठ्याद्यन्नोक्तं पूर्ववादिना।
उत्तरान्तर्गतं वाऽपि तद्ग्राह्यमुभयोरपि॥

कात्यायनः—उन्मत्तमत्तानिर्धूतमहापातकदूषिताः।
जडान्धवृद्धस्त्रीबाला विज्ञेयास्तु निरुत्तराः॥

मनुः—आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन[1] च।
नेत्रवक्त्रविकारैश्च[2] गृह्यतेऽन्तर्गतं मनः॥

याज्ञवल्क्यः—देशाद्देशान्तरं याति मुक्किणी परिलेढि च।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च॥
परिशुष्यत् स्खलद्वाक्यो विरुद्धं बहु भाषते।
वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि॥
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः।
अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः॥
सापदेशं हरेत्कालमब्रुवन्नपि संसदि।
उक्त्वा वचो विब्रुवंश्च हीयमानस्तु लक्ष्यते॥

---

१ ख भाषणेन। २ ख. °कारैश्च ग°।

अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधो जनः ॥
पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ।

इति भाषोत्तरपादानिरूपणम् ।

अथ संधिप्रकरणम् ।

बृहस्पतिः—पूर्वोत्तरे तु लिखिते प्रक्रान्ते कार्यनिर्णये ।
द्वयोः संतनयोः संधिः स्यादयःखण्डयोरिव ॥
प्रमाणसमता यत्र भेदः शास्त्रचरित्रयोः ।
तत्र राजाज्ञया संधिरुभयोरपि शस्यते ।
तस्मात्कुलगणाध्यक्षा धर्मज्ञाः समदृष्टयः ।
अद्वेषलोभा ब्रूयुर्यत्कर्तव्यमभिजानता ॥

इति संधिप्रकरणम् ।

अथ क्रियापादः ।

श्रुत्वा पूर्वोत्तरे सभ्यैर्निर्दिष्टा यत्र भावना ।
विभावयेत्प्रतिज्ञातं सोऽखिलं लिखितादिना ॥
कात्यायनः—वादिना यदभिप्रेतं स्वकं साधयितुं स्फुटम् ।
तत्साध्यं साधनं येन साध्यं तत्सिध्यतेऽखिलम् ॥
सारभूतं पदं त्यक्त्वा ह्यसाराणि बहून्यपि ।
प्रसाधयेत्क्रिया या तु तां जह्यात्सारवर्जिताम् ॥
निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वाऽपि पूर्वमावेदितं न यत् ।
यथा पक्वेषु धान्येषु निष्फलः प्रावृषो गुणः ॥
निर्णीतव्यवहाराणां प्रमाणमफलं तथा ।
याज्ञवल्क्यः—ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ।
तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ॥

---

१ ख. °युस्तत् ।

बृहस्पतिः—द्विप्रकारा क्रिया प्रोक्ता दैविकी मानुषी तथा।
एकैकाऽनेकधा भिन्ना ऋषिभिस्तत्त्ववेदीभिः॥
साक्षिणो लिखितं भुक्तिर्मानुषं त्रिविधं स्मृतम्।
धटाद्या धर्मजाता तु दैवी नवविधा क्रिया॥
साक्षी द्वादशभेदस्तु लिखितं दशधा स्मृतम्।
भुक्तिस्तु द्विविधा ज्ञेया दैवी नवविधा क्रिया॥
व्यासः—ऋणे लेख्यं साक्षिणो वा भुक्तिलेख्यादयोऽपि वा।
दैविकी वा क्रिया प्रोक्ता प्रजानां हितकाम्यया॥
याज्ञवल्क्यः—प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्।
एषामन्यतमाभावे दिव्यान्यतममुच्यते॥
नारदः—दिवाकृते कार्यविधौ ग्रामेषु नगरेषु च।
संभवे साक्षिणां चैव न दिव्या भवति क्रिया॥
कात्यायनः—यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम्।
मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः॥
यद्येकदेशव्याप्ताऽपि क्रिया विद्येत मानुषी।
सा ग्राह्या न तु पूर्णाऽपि दैविकीं वदतां नृणाम्॥
द्वारमार्गक्रियाभेदे जलवाहादिके तथा।
भुक्तिरेव तु गुर्वी स्यान्न लेख्यं न च साक्षिणः।
वाक्पारुष्ये महीवादे निषिद्धा दैविकी क्रिया।
प्रदातव्या प्रयत्नेन साहसेषु चतुर्ष्वपि॥
यदा साक्षी न विद्येत विवादे वदतां नृणाम्।
तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः॥
महापापाभियोगेषु निक्षेपहरणे तथा।
दिव्यैः कार्यं परीक्षेत राजा सत्स्वपि साक्षिषु॥
पूगश्रेणिगणादीनां या स्थितिः परिकीर्तिता।
तस्याश्च साधनं लेख्यं न दिव्यं न च साक्षिणः॥
व्यासः—रहःकृतं प्रकाशं च द्विविधं कार्यमुच्यते।
प्रकाशं साक्षिभिर्ज्ञेयं दैविकेन रहःकृतम्।
लिखिते साक्षिवादे च संदेहो जायते यदा॥

अनुमाने च संभ्रान्ते तदा दिव्यं नियोजयेत् ।
नारदः—अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे ।
न्यासापहरणे चैव दिव्या संभवति क्रिया ॥
समत्वं साक्षिणां यत्र दिव्या संभवति क्रिया ।
प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु ।
दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः ॥
यन्नामगोत्रैस्तुल्यं हि लेख्यकं तु क्वचिद्भवेत् ।
अगृहीते धने तत्र कार्यं दिव्येन निर्णयेत् ॥

इति क्रियापादः ।

अथ साक्षिनिरूपणम् ।

संदिग्धेषु च कार्येषु द्वयोर्विवदमानयोः ।
दृष्टश्रुतानुभूतत्वात् साक्षिभ्यो व्यक्तिदर्शनम् ।
समक्षदर्शनात् साक्षी विज्ञेयः श्रोत्रचक्षुषोः ।
साक्षी द्विभेदो विज्ञेयः कृत एकोऽकृतोऽपरः ॥
लेख्यारूढः कृतो ज्ञेयो मुक्तकोऽकृत उच्यते ।
बृहस्पतिः—लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ ।
याद्दश्चि(च्छि)कश्चोत्तरश्च कार्यमध्यगतस्तथा ॥
नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः ।
जातिनामादि लिखितं येन स्वं पित्र्यमेव च ॥
निवासं च स विज्ञेयः साक्षी लिखितसंज्ञकः ।
संधिक्रियां क्रियाभेदैस्तस्य कृत्वा ऋणादिके ॥
प्रत्यक्षं लिख्यते यश्च लेखितः स उदाहृतः ।
कुड्यव्यवहितो यस्तु शृणोति ऋणभाषितम् ॥
यथाश्रुतं यथाभूतं गूढसाक्षी स उच्यते ।
आहूय यः कृतः साक्षी ऋणन्यासक्रियादिके ।
स्मार्यते च मुहुः कार्यं स्मारितः सोऽभिधीयते ।
विभागदाने विपणे ज्ञातिर्यत्रोपदिश्यते ॥

द्वयोः समानो धर्मज्ञः कुल्यः स परिकीर्तितः ।
अर्थिप्रत्यर्थिवचनं शृणुयात् प्रेषितस्तु यः ॥
उभयोः संमतः साधुर्दूतकः स उदाहृतः ।
क्रियमाणे तु कर्तव्ये यः कश्चित् स्वयमागतः ॥
अत्र साक्षी त्वमस्माकमुक्तो यादृश्चि(च्छि)कः स्मृतः ।
यत्र साक्षी दिशो गच्छन् मुमूर्षुर्वा यथाश्रुतम् ॥
अन्यं संश्रावयेत्तं तु विद्यादुत्तरसाक्षिणम् ।
उभाभ्यां यश्च विश्वस्तः कार्यं चापि निवेदितम् ॥
गूढसाक्षी स विज्ञेयः कार्यमध्यगतस्तथा ।
अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतं भूभृता स्वयम् ॥
स एव तत्र साक्षी स्याद्विसंवादे द्वयोरपि ।
निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत् ।
अध्यक्षः सभ्यसहितः साक्षी स्यात्तत्र नान्यथा ॥
मुषितं खनितं यत्र सीमायाश्च समन्ततः ।
अकृतोऽपि भवेत्साक्षी ग्रामस्तत्र न संशयः ॥

बृहस्पतिः—नव स्युः सप्त वा पञ्च चत्वारस्त्रय एव वा ।
उभौ वा श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत्कदाचन ॥

याज्ञवल्क्यः—उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित् ॥

नारदः—अथवा कालनियमो न दृष्टः साक्षिणं प्रति ।
स्मृत्यपेक्षं हि साक्षित्वमाहुः शास्त्रविदो जनाः ॥
यस्य नोपहता बुद्धिर्दृष्टिश्रोत्रे च नित्यशः ।
सुदीर्घेणापि कालेन स वै साक्षित्वमर्हति ॥

याज्ञवल्क्यः—तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ।
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥
व्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः ।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥

कात्यायनः—स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः ।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः ॥

नारदः—असाक्ष्यपि हि साक्ष्येषु दृष्टः पञ्चविधो बुधैः ।
वचनाद्दोषतो भेदात्स्वयमुक्तो मृतान्तरः ॥
श्रोत्रियास्तापसा वृद्धा ये च प्रव्राजिता नराः ।
असाक्षिणस्ते वचनान्नात्र हेतुरदाहृतः ॥
स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा ।
असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते ॥
राज्ञा परिगृहीतेषु साक्षिष्वेकार्थनिश्चये ।
वचनं यत्र भिद्येत ते स्युर्भेदान्न साक्षिणः ॥
स्वयमुक्तो न निर्दिष्टः स्वयमेवैत्य यो वदेत् ।
सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हति ॥
योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि ।
क तद्वदन्तु साक्षित्वमित्यसाक्षी मृतान्तरः ॥
याज्ञवल्क्यः—स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः ।
रङ्गावतारी पाषण्डी कूटकृद्विकलेन्द्रियः ॥
पतितार्तार्थसंबन्धिसहायरिपुतस्कराः ।
साहसी दृष्टदोषश्च निर्धूतश्चेत्यसाक्षिणः ॥
नारदः—असाक्षिणो ये निर्दिष्टा दासनैकृतिकादयः ।
कार्यगौरवमासाद्य भवेयुस्तेऽपि साक्षिणः ॥
तेषामपि न बालः स्यान्नैको न स्त्री न कूटकृत् ।
न बान्धवो न चारातिर्ब्रूयुस्ते साक्ष्यमन्यथा ॥
बालोऽज्ञानादमत्या स्त्री पापाभ्यासाच्च कूटकृत् ।
विब्रूयुर्बान्धवाः स्नेहाद्वैरनिर्यातनादरिः ॥
एको लुब्धस्त्वसाक्षित्वाद्वध्यः शुच्योऽपि न स्त्रियः ।
स्त्रीबुद्धेरस्थिरत्वाच्च दोषैश्चान्येऽपि ये वृताः ।
सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे ॥
व्यासः—स्तेये च साहसे चैव संसर्गे च परस्त्रियः ।
रागादीनां प्रयोगे च न दोषः साक्षिषु स्मृतः ॥
मनुः—अनुभावी तु यः कश्चित् कुर्यात्साक्ष्यं विवादिनाम् ।
अन्तर्वेश्मन्यरण्ये वा शरीरस्यैव चात्यये ॥

याज्ञवल्क्यः—ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्मसु।
साहसात्ययिके चैव परीक्षा कुत्रचित् स्मृता॥
बृहस्पतिः—साक्षिणोऽर्थी समुद्दिष्टान् सत्सु दोषेषु दूषयेत्।
अदुष्टान् दूषयन् वाऽपि तत्समं दण्डमर्हति॥
साक्ष्यदोषाश्च ये केचित् साक्षिणां चैव ये स्मृताः।
वादकाले तु वक्तव्याः पश्चादुक्तं न दूषयेत्॥
साक्ष्यदोषाः प्रयोक्तव्याः संसदि प्रतिवादिना।
पत्रे विलिख्य तान् सर्वान् वाच्यं प्रत्युत्तरं ततः॥
प्रतिपत्तौ न साक्षित्वमर्हन्ति तु कदाचन।
अतोऽन्यथा भावनीयाः क्रियायां प्रतिवादिना॥
अभावयन् दमं दाप्यः प्रत्यर्थी साक्षिणा स्फुटम्।
भाविताः साक्षिणः सर्वे साक्षिधर्मनिराकृताः॥
प्रत्यार्थिनोऽर्थिनो वाऽपि साक्षिदूषणसाधने।
प्रस्तुतार्थोपयोगेन व्यवहारान्तरं न च॥
जितः सविनयं दाप्यः शास्त्रदृष्टेन कर्मणा।
यदि वादी निराकाङ्क्षः साक्षी[1] सत्ये व्यवस्थितः॥
उक्तेऽर्थे साक्षिणो यस्तु दूषयन् प्रागदूषितान्।
न च तत्कारणं ब्रूयात् प्राप्नुयात् पूर्वसाहसम्॥
कात्यायनः—न कालहरणं कार्यं राज्ञा साक्षिप्रभाषणे।
महान् दोषो भवेत्कालाद् धर्मव्यावृत्तिलक्षणात्॥
पृच्छेच्चियम्य शपथैर्भृशमाहूय साक्षिणः।
समस्तान् विदिताचारान् विज्ञातार्थान् पृथक् पृथक्॥
मनुः—देवब्राह्मणसांनिध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्॥
सभान्तः साक्षिणः सर्वानर्थिप्रत्यर्थिसंनिधौ।
प्राड्विवाको नियुञ्जीत विधिनाऽनेन सान्त्वयन्॥
यद्द्वयोरनयोर्वित्तकार्येऽस्मिन् चोदितं मिथः।
तद् ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता॥

---

१ ख. साक्षिदो°।

सत्यं साक्ष्ये ब्रुवन् साक्षी लोकानाप्नोति पुष्कलान्।
इह चानुत्तमां कीर्तिं सुखी स्याल्लोकयोर्द्वयोः॥
साक्ष्येऽनृतं वदन् पाशैर्बध्यते वारुणैर्नरः।
विवशः[शतमाजाति] तस्मात् साक्षी वदेदृतम्॥
नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः।
दीनः शत्रुगृहं गच्छेद्यः साक्ष्यमनृतं वदेत्॥
ब्रह्मघ्नस्य तु ये लोका ये च स्त्रीबालघातिनः।
मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा॥
जन्मप्रभृति यत्किंचित् पुण्यं भद्र त्वया कृतम्।
तत्सर्वमाशु नो गच्छेद्यदि ब्रूयास्त्वमन्यथा॥
अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं पतेत्।
यः प्रश्नं वितथं ब्रूयात्पृष्टः सन्धर्मनिश्चये।
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते॥
हन्ति जातानुजातांश्च हिरण्यार्थेऽनृतं वदन्।
सर्वं भूम्यनृतं हन्ति मा स्म भूम्यनृतं वदः॥
यथाश्रुतं यथादृष्टं सत्यमेवाञ्जसा वद।

बृहस्पतिः—ब्रूहीति ब्राह्मणं ब्रूयात्सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैश्च पातकैः॥

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान्॥
प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत्॥
ये व्यपेताः स्वधर्मेभ्यः परपिण्डोपजीविनः।
द्विजत्वमभिकाक्षन्ते तांश्च शूद्रवदाचरेत्॥
वर्णानुरूपैः शपथैः शपनीयं पृथक्पृथक्।
कामिनीषु विवाहेषु गवां भुक्ते तथेन्धने॥
ब्राह्मणाभ्यवपत्तौ च शपथे नास्ति पातकः (कम्)।
सभान्तरस्थैर्वक्तव्यं साक्ष्यं नान्यत्र साक्षिभिः॥

सर्वसाक्ष्येष्वयं धर्मो ह्यन्यत्र स्थावरेषु च।
वधे चेत्प्राणिनां साक्ष्यं वादयेच्छवसंनिधौ।
तदभावे तु चिह्नस्य नान्यथैव विवादयेत्॥
विवाहोपानदुष्णीषं दक्षिणं पाणिमुद्धरन्।
हिरण्यगोशकृद्दर्भान्समादाय ऋतं वदेत्॥
नापृष्टैरनियुक्तैर्वा समं सत्यं प्रयत्नतः।
वक्तव्यं साक्षिभिः साक्ष्यं विवादस्थानमागतैः।
स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितम्॥
उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनः।
साक्षिसभ्यावसन्नानां नैव पौनर्भवो विधिः॥
उपस्थितान् परीक्षेत साक्षिणो नृपतिः स्वयम्।
साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षयेत्॥
उपस्थिताः परीक्ष्याः स्युः स्वरवर्णेङ्गितादिभिः।
पृथक् पृथग्दण्डनीयाः कूटकृत्साक्षिणो नराः॥
विवादाद्द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः।
लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च॥
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते।
लोभात्सहस्रं दण्डः स्यान्मोहात्पूर्वं तु साहसम्॥
भयाद्वै मध्यमो दण्डो मैत्रात्पूर्वं तु साहसम्।
कामाद्दशगुणं पूर्वं क्रोधात्तु द्विगुणं परम्॥
अज्ञानाद् द्वे शते पूर्णे बालिश्याच्छतमेव तु।
कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः॥
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत्।
यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः।
रोगोऽग्निर्ज्ञातिमरणं दाप्यो दण्डश्च तत्समम्॥
न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥
सम्यक्क्रियापरिज्ञाने देयः कालस्तु साक्षिणाम्।
संदिग्धं तत्र साक्ष्यं तु सद्यः स्पष्टं विवादयेत्॥

त्रिपक्षादब्रुवन् साक्ष्यमृणादिषु नरोऽगदः ।
प्राप्नुयात्तद्दृणं सर्वं दशबन्धं च सर्वतः ॥
वर्णिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
तत्पावनाय निर्वाप्यश्चरुः सारस्वतै(तो)र्द्विजैः ॥
उदित्यृचा च वारुण्या त्वृचेनाब्दैवतेन च ।
कूश्माण्डैर्वाऽपि जुहुयाद् घृतमग्नौ यथाविधि ॥
बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः ।
समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥
कालाकृतिवयोद्रव्यदेशजातिप्रमाणतः ।
अन्यूनं चेन्निगदितं सिद्धं साध्यं विनिर्दिशेत् ॥
साध्यार्थांशे निगदिते साक्षिभिः सकलं भवेत् ।
स्त्रीसङ्गे साहसे चौर्ये यत्साध्यं परिकल्प्यते ॥
यस्याऽऽहुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
न्यूनमप्यधिकं वाऽर्थं प्रब्रूयुर्यत्र साक्षिणः ।
तदाऽप्यनुक्तं विज्ञेयमेष साक्ष्यविधिः स्मृतः ॥

इति साक्षिनिरूपणम् ।

अथ लेख्यनिरूपणम् ।

राजलेख्यं स्थानलेख्यं स्वहस्तलिखितं तथा ।
लेख्यं तु त्रिविधं प्रोक्तं भिन्नं तद्दशधा पुनः ॥
दानलेख्यं भागलेख्यं सीमालेख्यं तथैव च ।
क्रयलेख्यं दासलेख्यमाधिलेख्यं ततः परम् ॥
संविदुद्दामलेख्यं च जयपत्रकमेव च ।
संधिपत्रं तथैवैतत् क्रियाभेदादनेकधा ॥
भूमिं दत्त्वा तु यत् कुर्याल्लेख्यं चन्द्रार्ककालकम् ।
अनाच्छेद्यमनाहार्यं दानलेख्यं तु तत् स्मृतम् ॥
विभागपत्रमित्येतद् भागिनां निर्णये कृते ।
सीमाविवादे निर्णीते सीमापत्रमिति स्मृतम् ॥

गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्यक्रयान्वितम् ।
पत्रं कारयते यत्तु लेख्यं तत् क्रयमुच्यते ॥
आध्यर्थमाधिलेख्यं स्याद्दासार्थं दासपत्रकम् ।
समीहितार्थसिद्ध्यर्थं ग्रामे श्रेणिगणादिभिः ॥
शास्त्राविरोधधर्मार्थे कृतं संवित्तिपत्रकम् ।
धनं गृहीत्वा वृद्ध्यर्थं स्वयं कुर्याच्च कारयेत् ॥
उद्धामपत्रं तत् प्रोक्तमृणलेख्यं मनीषिभिः ।
यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम् ॥
लेख्यं तु साक्षिमत् कुर्यात् तस्मिन् धनिकपूर्वकम् ।
समामासतदर्धाहर्नामजातिस्वगोत्रकम् ॥
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ।
समाप्तेऽर्थे ऋणीनाम स्वहस्तेन निवेशयेत् ॥
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ।
उभयाभ्यर्थितेनेदं मया ह्यमुकसूनुना ॥
लिखितं ह्यमुकेनेति लेखकस्त्वन्ततो लिखेत् ।
साक्षिणश्च स्वहस्तेन पितृनामाङ्कपूर्वकम् ॥
अत्राहममुकः साक्षी लिखेयुरिति ते समाः ।
विनाऽपि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् ॥
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृताहते ।
अलिपिज्ञो ऋणी यः स्यात् स्वमतं लेखयेत्तु सः ॥
साक्षी वा साक्षिणाऽन्येन सर्वसाक्षिसमीपतः ।
यथोपन्यस्त [सा]ध्यर्थसंयुक्तं सोत्तराक्रियम् ॥
सावधारणकं चैव मुद्रितं राजमुद्रया ।
राज्ञः स्वहस्तचिह्नं च वादिप्रत्यर्थिसंयुतम् ॥
प्राड्विवाकादिहस्ताङ्कं जयपत्रकमिष्यते ।
संधौ कृते तु यल्लेख्यं संधिलेख्यमिति स्मृतम् ॥
देशाचारस्थितियुतं करलेख्यमिति स्मृतम् ।
समामासादिहीनं तु प्रमाणं तद्भवेत्पुनः ॥

राजा स्वहस्तचिह्नेन संधिविग्रहलेखकैः।
लिखितं राजनामाङ्कं मुद्रितं राजमुद्रया॥
समामासतदर्धाहर्नामजात्यादिचिह्नितम्।
स्पष्टवर्णक्रमोपेतमविलुप्तक्रमाक्षरम्॥
राजशासनमेतत्स्यादुत्तमं सर्वलेख्यतः।
देशाचाराविरुद्धं यव्यक्तादिविधिलक्षणम्॥
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम्।
देशान्तरस्थे दुर्लेख्ये नष्टे दुष्टे हृतेऽपि वा॥
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत्।

कात्यायनः—साक्षिदोषाद्धवेद्दुष्टं पत्रं वै लेखकस्य वा।
धनिकस्योपधादोषात्तथा धारणकस्य च॥

बृहस्पतिः—मुमूर्षुशिशुभीतार्तस्त्रीमत्तव्यसनातुरैः।
निश्शोपधिबलात्कारकृतलेख्यं न सिध्यति॥

दूषितो गर्हितः साक्षी यत्रैकोऽपि निवेशितः।
कूटलेख्यं तु तत्तु प्रोक्तं लेखको वाऽपि तद्विधः॥
यदुज्ज्वलं चिरकृतं मलिनं स्वल्पकालिकम्।
भग्नोन्मृष्टाक्षरयुतं लेख्यं कूटत्वमाप्नुयात्॥
दर्पणस्थं यथा बिम्बमसत् सदिव दृश्यते।
तथा लेख्यस्य बिम्बानि कुर्वन्ति कुशला जनाः॥
लेख्यमालेख्यवत् केचिल्लिखन्ति कुशला जनाः।
तस्मान्न लेख्यसामर्थ्यात्सिद्धिरैकान्तिकी मता॥
स्त्रीबालार्तान् लिप्यविज्ञान् वञ्चयन्ति स्वबान्धवाः।
लेख्यं कृत्वा स्वनामाङ्कं ज्ञेयं युक्त्यागमैस्तु तत्॥
परीक्ष्यमेतदुभयं स्वयं राज्ञा विशेषतः।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः॥

कात्यायनः—लेख्ये संशयमापन्ने साक्षिलेखककर्तृषु।
नष्टेषु तेषु तल्लेख्यं कृतपूर्वाक्षरादिभिः॥
यथा लाभोपपन्नैस्तैर्निर्णयं कारयेन्नृपः।
दुष्टे पत्रे स्फुटं दोषं नोक्तवान्नृणिको यदि॥

ततो विंशतिवर्षाणि क्रान्तं पत्रं स्थिरं भवेत् ।
याज्ञवल्क्यः—संदिग्धे लेख्यसिद्धिः स्यात् स्वहस्तलिखितादिभिः ॥
युक्तिप्राप्तिक्रियाचिह्नसंबन्धागमहेतुभिः ।
ऋणिस्वहस्तसंदेहे जीवतो वा मृतस्य वा ॥
तत्स्वहस्तकृतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः ।
मया नैतत्कृतं पत्रं कूटमन्येन कारितम् ।
अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः ॥
बृहस्पतिः—कुलश्रेणिगणादीनां यथाकालं प्रदर्शितम् ।
श्रावयेत्स्मारयेच्चैव तथा स्याद्बलवत्तरम् ॥
यदि लब्धं भवेत्किंचित्प्रज्ञप्तिर्वा तथा भवेत् ।
प्रमाणमेव लिखितं मृता यद्यपि साक्षिणः ॥
नारदः—दर्शितं प्रतिकालं यच्छ्रावितं स्मारितं च यत् ।
लेख्यं सिध्यति सर्वत्र मृतेष्वपि च साक्षिषु ॥
शक्तस्य संनिधावर्थो यस्य लेख्येन भुज्यते ।
वर्षाणि विंशतिं यावत्तत्पत्रं दोषवर्जितम् ॥
वाचकैर्यदि सामर्थ्यमक्षराणां निहन्यते ।
क्रियाणां सर्वनाशः स्यादनवस्था च जायते ॥
लिखितं बलवन्नित्यं बलवत्स्वपि साक्षिषु ।
न जातु हीयते लेख्यं साक्षिभिः शपथेन वा ॥
लेख्ये सति च वादेषु न स्याद्दिव्यं न साक्षिणः ।
तद्युक्तिप्रतिलेख्येन तद्विशेष्टेन वा पुनः ॥
लेख्यक्रियां निरस्येत न साक्षी शपथैः क्वचित् ।
बृहस्पतिः—लेख्यं त्रिंशत्समातीतमदृष्टाश्रावितं तु यत् ।
न तत्सिद्धिमवाप्नोति तिष्ठत्स्वपि च साक्षिषु ॥
नारदः—मृताः स्युः साक्षिणो यत्र धनिकर्णिकलेखकाः ।
तदप्यपार्थं लिखितं न चेदाधिः स्थिराश्रयः ॥
आदातरि तिरोभूतमाविर्भूतं मृते सति ।
अनात्तवित्तं तल्लेख्यं प्रतिदत्तमथापि वा ॥

बृहस्पतिः—उन्मत्तजलभीतानां राजभीतप्रवासिनाम् ।
अप्रगल्भामयार्तानां न लेख्यं हानिमाप्नुयात् ॥

इति लेख्यनिरूपणम् ।

अथ द्रव्यागमप्रकरणम् ।

बृहस्पतिः—धनमूलाः क्रियाः सर्वा यत्नास्तत्साधने मताः ।
वर्धनं रक्षणं भोग इति तस्य विधिक्रमः ॥
तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च ।
कृष्णं च तत्र विज्ञेयः प्रभेदः सप्तधा पुनः ॥
श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं शुक्लमुभ[यो]र्ह्यस्य तद्विधः ॥
कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः ।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ।
पाशकद्यूतद्यूतार्थप्रतिरूपकसाहसैः ॥
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ।
तेन क्रयो विक्रयश्च दानं ग्रहणमेव च ॥
विविधाश्च प्रयुज्यन्ते क्रियाः संभोगमेव च ।
यथाविधेन द्रव्येण यत्किंचित्कुरुते नरः ॥
तथाविधमवाप्नोति तत्फलं प्रेत्य चेह च ।
तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयं स्मृतम् ॥
साधारणं स्यात् त्रिविधं शेषं नवविधं स्मृतम् ।
क्रमागतं प्रीतिदायं प्राप्तं च सह भार्यया ॥
अविशेषेण सर्वेषां वर्णानां त्रिविधं स्मृतम् ।
वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणम् ।
प्रतिग्रहणलब्धं यद्याज्यं तच्छिष्यतस्तथा ॥
त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् ।
युद्धोपलब्धं करतो दण्डाच्च व्यवहारतः ॥
वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम् ।
कृषिगोरक्षवाणिज्यं शूद्रस्यैषामनुग्रहात् ॥

सर्वेषामेव वर्णानामेवं धर्म्यो धनागमः ।
विपर्ययाद्धर्मः स्यान्न चेदापद् गरीयसी ॥
आपत्स्वनन्तरा वृत्तिर्ब्राह्मणस्य विधीयते ।
वैश्यवृत्तिश्च तस्योक्ता न जघन्या कथंचन ।
कथंचन न कुर्वीत ब्राह्मणः कर्म वार्षलम् ॥
वृषलः कर्म न ब्राह्मं पतनीये हि ते तयोः ।
उत्कृष्टं चापकृष्टं च तयोः कर्म न विद्यते ॥
मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते ।
आपदं ब्राह्मणस्तीर्त्वा क्षत्रवृत्त्या भृते जने ॥
उत्सृजेत् क्षत्रवृत्तिं तां कृत्वा पावनमात्मनः ।
तस्यामेव तु यो भुक्तौ ब्रह्मणो रमते रसात् ॥
काण्डपृष्ठ[श्रु]तो मार्गादङ्गितोऽयं प्रकीर्तितः ।

इति द्रव्यागमप्रकरणम् ।

अथानुभोगानुसिद्धिः ।

पित्र्यलब्धक्रयादानरिक्थशौर्यप्रवेदनात् ।
प्राप्ते सप्तविधे भोगः स मार्गः सिद्धिमाप्नुयात् ॥
त्रिभिरेव तु या भुक्ता पुरुषैर्भूर्यथाविधि ।
लेख्याभावेऽपि तां तत्र चतुर्थः समवाप्नुयात् ॥

व्यासः—यद्विनागममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।
न तच्छक्यमपाकर्तुं क्रमात् त्रिपुरुषागतम् ॥
आदातुः कारणं दानं मध्ये भुक्तिस्तु सागमा ।
अन्ततो भुक्तिरेवैका संतता या चिरंतनी ॥

कात्यायनः—पञ्चत्रिंशच्च वर्षाणि पौरुषो भोग उच्यते ।
विंशद्वर्षागता भूमेर्भुक्तिः सा पौरुषी स्मृता ।
त्रिपौरुषी तत्त्रिगुणा तस्मान्नान्वेष्य आगमः ॥
वर्षाणि विंशतिं भुक्त्वा स्वामिना व्याहता सती ।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा च द्विपौरुषी ॥

त्रिपौरुषी तच्त्रिगुणा तस्मान्नान्वेष्य आगमः ।
कात्यायनः—मुख्या पैतामही भुक्तिः पैतृकी वाऽपि संमता ।
वयोपेतैरविच्छिन्ना स्थिरा षष्ट्याब्दिकी मता ॥
व्यासः—सागमो दीर्घकालश्च निश्छिद्रो निरनन्तरः ।
प्रत्यार्थिसंनिधानश्च पञ्चाङ्गो भोग इष्यते ॥
यद्येकशासने ग्रामक्षेत्रारामाश्च लेखिताः ।
एकदेशोपभोगेन सर्वे भुक्ता भवन्ति ते ।
नारदः—लिखितं बलवन्नित्यं जीवन्तस्त्वेव साक्षिणः ।
कालातिहरणाद् भुक्तिरिति शास्त्रेषु निश्चयः ॥
भुक्तिस्तु द्विविधा प्रोक्ता सागमा नागमा तथा ।
त्रिपौरुषी या स्वतन्त्रा भवेदन्या तु सागमा ।
कात्यायनः—नोपभोगबलं कार्यमाहर्त्रा तत्सुतेन वा ।
पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थितः ॥
आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।
अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥
नारदः—अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चोरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः ॥
विद्यमानेऽपि लिखिते जीवत्स्वपि हि साक्षिषु ।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् ॥
भुज्यमानान् परैरर्थान् यस्तु मोहादुपेक्षते ।
समक्षं जीवतोऽप्यस्य तद्भुक्तिः कुरुते वशे ।
प्रत्यक्षपरिभोगात्तु स्वामिनो द्विदशाः समाः ॥
आध्यादीन्यपि जीर्येयुः स्त्रीनरेन्द्रधनादृते ।
पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ॥
परेण भुज्यमानाया धनस्य दशवार्षिकी ।
आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः ॥
अपहार्यौ भवेतां तु दीर्घकालमवस्थितौ ।
बृहस्पतिः—पश्यन्नन्यस्य ददतः क्षितिं यो न निवारयेत् ।

---

१ ख. °क्ता वदन्ति ।

स्वामी सताऽपि लेख्येन न स तां लब्धुमर्हति ॥
भूमेरभुक्तिर्लेख्यस्य यथाकालमदर्शनम् ॥
साक्ष्यस्यास्मरणं चैव स्वार्थहानिकराणि तु ।
इत्यनुभोगानुसिद्धिः ।

अथान्यभोगापवादः ।
बृहस्पतिः—भुक्तिस्त्रिपौरुषी सिद्ध्यै वैरेषा नात्र संशयः ।
अनुवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति ॥
सनाभिभिर्बान्धवैश्च भुक्तं यत् स्वजनैस्तथा ।
भोगात्तत्र न सिद्धिः स्याद्भोगमन्येषु कल्पयेत् ॥
याज्ञवल्क्यः—आधिसीमोपनिक्षेपजलबालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥
अशक्ताज्ञसरोगार्तबालभीतप्रवासिनाम् ।
शासनारूढमन्येन भुक्तं भुक्त्या न हीयते ।
संप्रीत्या भुज्यमानानि न नश्यन्ति कदाचन ।
धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते ॥
इत्यन्यभोगापवादः ।

अथ विच्छिन्नभोगनिर्णयः ।
छिन्नभोगे गृहक्षेत्रे संदिग्धं यत्तु जायते ।
लेख्येन भोगविद्भिर्वा साक्षिभिस्तद्विभावयेत् ।
नाम मासागमौ संख्यां दिग्भागं कालमेव च ॥
भोगच्छेदनिमित्तं च ये विदुस्तत्र साक्षिणः ।
अपृष्टास्ते तु यद्ब्रूयुः संदेहे समदृष्टयः ॥
तत्प्रामाण्यात्तु कर्तव्यमेवं धर्मो न हीयते ।
इति विच्छिन्नभोगनिर्णयः ।

अथ कोशपानादिविधिः ।
असाक्षिके चिरकृते पृच्छेदुत्तरसाक्षिणम् ।
शपथान् वा प्रयुञ्जीत युक्तिलेशमथापि वा ॥